उत्तरे नवमण्डलालि कुर्यात् ।
तत्तदावरणानन्तरं बलिदानाभावपक्षे अत्रैव नवावरण बलिं दद्यात् ।
ऐं ह्रीं श्रीं व्यापकमण्डलेभ्यो नमः ।
इति मण्डलानि संपूज्य नवावरणबलिदेवताभ्यो नमः । नवावरण बलिदेवता इहागच्छतागच्छत इत्यावाह्य। ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः इति सकली कृत्य बलिपात्राणि निधाय नवावरण बलिदेवताभ्यो नमः। इति संपूज्य।

प्रथमावरण बलिदानं

ऐं नमः उच्छिष्टचाण्डलि क्लीं मातङ्गि सौः सर्ववशंकरि स्वाहा।
हस्तिपिशाचिलिखे स्वाहा। (श्यामलोच्छिष्टगणपतिभ्यां नमः एष वां बलिर्नमः)

द्वितीयवरण बलिदानं

क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकाळिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।
ॐ ह्रीं क्ष्म्रां हूं महाकाळाय हौं महादेवाय क्रीं कालिकायै हौं कालीं महाकालाभ्यां नमः। ( दक्षिणकाळिके महाकालाय एष वां बलिर्नमः)

तृतीयावरण बलिदानं

ॐ ह्लीं बगळामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भ्य जिह्वां कीलय बुद्धिं विनाशय ह्लीं ओं स्वाहा ।
ॐ श्रीं ह्रीं क्लीं ग्लौं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा ।
( बगळामहागणपतिभ्यां एष वां बलिर्नमः )

तुरीयावरण बलिदानं

क्लीं ।
क्लीं कृष्णाय नमः । (कामेश्वरीकृष्णाभ्यां नमः एष वां बलिर्नमः )

पञ्चमावरण बलिदानं

ह्स्लैं हस्क्लीं हस्रौः ।
ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ।
(त्रिपुरभैरवापदुद्धारकाभ्यां नमः एष वां बलिर्नमः)

षष्टावरण बलिदानं

ॐ कटुके कटुकपत्रे सुभगे आसुरि रक्ते रक्तवाससे अथर्वस्य दुहिते अघोरे अघोरकर्मकारिके । (अमुकस्य) गतिं दह दह उपविष्टस्य गुदं दह दह सुप्तस्य मनो दह दह ॥ प्रबुद्धस्य ह्रदयं दह दह । हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुं फट् स्वाहा ।
ॐ चण्डभैरव अमुकं संहारय स्वाहा ॥ ( कटुकी चण्डभैरवाभ्यां नमः एष वां बलिर्नमः )

सप्तमावरण बलिदानं

ऒं ऐं ह्रीं क्लीं श्रीं कालरात्रेश्वरि सर्वजनमनोहरि सर्वमुखस्तम्भिनि सर्वराज वशंकरि सर्वदुष्टनिर्दलिनि सर्व स्त्रीपुरुषाकर्षिणि वन्दि शृङ्खलास्त्रोटय स्त्रोटय सर्वदुष्टान् जम्भय जम्भय द्वेष्ट्टन् निर्दल्य निर्दल्य सर्वान् स्तम्भय स्तम्भय मोहनास्त्रेण द्वेषिणयुच्चाटयोच्चाटय सर्व वशं कुरु कुरु स्वाहा देहि देहि सर्वं कालरात्रे कामिनीगणेश्वरि नमः ।
ऒं फ्रों ज्रीं क्लीं भ्रूं आं ह्रीं क्रों श्रीं हुं फट कार्तवीर्याजुनाय नमः ॥
(कालरात्रिकार्तवीर्याजुनाभ्यां नमः एष वां बलिर्नमः)

आऽमावरण बलिदानं

ह्रीं श्रीं क्लीं ओं नमो भगवति अन्नपूर्णे ममाभिलषितमन्नं देहि स्वाहा ।
ओं नमः शिवाय ॥ (अन्नपूर्णाशिवाभ्यां नमः एष वां बलिर्नमः )

नवमावरण बलिदानं

ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीम् ओं महालक्ष्म्यै नमः ।
हं ओं ईं उग्रं वीरं महाविष्णुं ज्लन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् हं ईं ओं । (महालक्ष्मीनृसिंहाभ्यां नमः एष वां बलिर्नमः )